**B.A. 1st Semester (Honours) Examination, 2020-21**

**Subject: Sanskrit**

**Course ID: 10912** **Course Code: AHSNS-102C-2**

**Course Title: Classical Sanskrit Literature (Prose)**

**Full Marks: 40** **Time: 2hrs**

**The figures in the margin indicate full marks.**

**अधोलिखितेषु प्रश्नेषु Group-A इत्यतः द्वयोः प्रश्नयोः, Group-B इत्यतः द्वयोः प्रश्नयोः, Group-C इत्यतश्च एकस्य प्रश्नस्योत्तरं देयम्। तेषु यथेच्छं द्वयोः प्रश्नयोरुत्तरमवश्यमेव संस्कृतभाषया देवनागरलिप्या च लेख्यम्।**

Group-A

**(दशकुमारचरिते)** 2×2=4

(a) 'पङ्कमिदानीं त्वत्पादपद्मपरिचर्याफलम् '- का अत्र वक्त्री? कस्य पादपद्मं तया सेवितम्? तत्फलं कथं पङ्कं जातम् ?

(b) राजवाहनं प्रति चण्डवर्मणः कोपकारणं किमासीत्?

(c) दशकुमारचरिते दशकुमाराः के सन्ति?

Group-B

**(कादम्बर्याः कथामुखे)** 2×2=4

(a) कादम्बरी इति कीदृशं काव्यम्? तत्र नायिका-नायकौ कौ स्तः ?

(b) कादम्बरी इति शब्दस्य कोऽर्थः ?

(c) शूद्रकः क आसीत् ?

Group-C

**(कादम्बर्याः शुकनासोपदेशे)** 2×1=2

(a) 'अतिगहनं तमो यौवनप्रभवम्' - कः कं प्रति एवम् उक्तवान् ? कथं यौवनप्रभवं तमः अतिगहनम् ?

(b) चन्द्रापीडः कथं शुकनासमुपदिष्टवान् ?

Group-A

**(राजवाहनचरिते)**

**2. अधस्तनेषु द्वयोः सन्दर्भयोर्व्याख्या संस्कृतभाषया देवनागरलिप्या च कार्या** 5×2=10

(a) दयित त्वत्प्रसादादद्य मे चरितार्था श्रोत्रवृत्तिः। अथ मे मनसि तमोपहस्त्वया दत्तो ज्ञानप्रदीपः।

(b) तुमुले चास्मिन् समयेऽनियन्त्रितप्रवेशाः 'किं किम्' इति सहसोपसृत्य विविशुरन्तर्वेशिकाः पुरुषा ददृशुश्च तदवस्थं राजकुमारम्।

(c) न शेकतुस्तु तमप्रभुत्वादुत्तारयितुमापदः।

## Group-B

## (कादम्बर्याः कथामुखे)

**3. कस्यचन एकस्य व्याख्या देवभाषया देवनागरलिप्या च क्रियताम् ।** 5×1=5

(a) यस्य च हृदयस्थितानपि पतीन् दिधक्षुरिव प्रतापनलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल ।

(b) अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसम्पर्ककलंकमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः ।

## Group-C

## (कादम्बर्याः शुकनासोपदेशे)

**4. सुरगिरा देवनागर्या च यथेच्छमेकतरस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्या ।** 5×1=5

(a) यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः । अनुज्झितधवलापि सरागैव भवति यूनां दृष्टिः ।

(b) अपरिणामोपशमो दारुणो लक्ष्मीमदः । कष्टमनञ्जनवर्तिसाध्यमपरम् ऐश्वर्यतिमिरान्धत्वम् ।

**5. अधोलिखितेषु प्रश्नेषु कस्यचिदेकस्योत्तरं प्रदेयम् ।** 10×1=10

(a) चन्द्रापीडं प्रति शुकनासोपदेशाः लिख्यन्ताम् ।

(b) ‘राजवाहनचरितम्’ इति आख्याने वर्णितं राजवाहनचरितं वर्ण्यताम् ।

(c) कादम्बर्याः कथामुखानुसारं शूद्रकचरितं वर्ण्यताम् ।